# श्रीमध्व श्लोकगळु

जयति पराशरसूनुः सत्यवतीहृदयनंदनो व्यासः ।
यस्यास्यकमलगलितं वान्मयममृतं जगत्पिबति ॥

भवति यदनुभावादेदमुकोपि वाग्मि
जडमतिरपि जंतुर्जायते प्राज्ञमौलिः ।
सकलवचनचेतोदेवता भारतीशा
मम वचसि निधताम् सन्निधिम् मानसे च ॥

प्रथमोहनुमन्नामद्वितीयो भीम एव च
पूर्णप्रज्ञः तृतीयस्तु भगवत् कार्य साधकः ।

लसतु श्रीमदानंदतीर्थेंदुर्नो हृदंबरे ।
यद्वचश्चंद्रिका स्वांतसंतापपं विनिकृंतति ॥

अभ्रमं भंगरहितमजडं विमलं सदा ।
आनंदतीर्थमतुलं भजे तापत्रयापहम् ॥

योविप्रलंभ विपरीतमतिप्रभूतान्
वादान् निरस्य कृतवान् भुवि तत्ववादम् ।
सर्वेश्वरो हरिरिति प्रतिपादयंतम्
आनंदतीर्थ मुनिवर्यम् अहम् नमामि ॥

पृथ्वी मंडल मध्यस्थाः पूर्णबोध मतानुगाः ।
वैष्णव विष्णुहृदयस्तान्नमस्ये गुरून्मम ॥

नमस्ते प्राणेश प्रणत विभवाय निगमाह
नमः स्वामिन् रामप्रियतम हनूमान्गुरुगुण ।
नमस्तुभ्यम् भीमप्रबलतम कृष्णेष्टभगवन्
नमः श्रीमन्मध्वप्रदिशसुदृशम् नो जय जय ॥